## सुन्दरकाण्ड एकोनषष्टितमः सर्गः (५९) - समानान्तर कार्यलोचनम्

एतदाख्याय तत् सर्वं हनुमान् मारुतात्मजः ।
भूयः समुपचक्राम वचनं वक्तु मुत्तरम् ॥ १ ॥

सफलो राघवोद्योगः सुग्रीवस्य च सम्भ्रमः ।
शीलमासाद्य सीताया मम च प्रवणं मनः ॥ २ ॥

तपसा धारयेल् लोकान् क्रुद्धो वा निर्दहेदपि ।
सर्वथाति प्रवृद्धोऽसौ रावणो राक्षसाधिपः ॥ ३ ॥

तस्य तां स्पृशतो गात्रं तपसा न विनाशितम् ।
न तदग्नि शिखा कुर्यात् संस्पृष्टा पाणिना सती ॥ ४ ॥

जनकस् यात्मजा कुर्याद् यत्क्रोध कलुषी कृता ।
जाम्बवत्प्रमुखान्सर्वाननुज्ञाप्य महाहरीन् ॥ ५ ॥

अस्मिन् नेवं गते कार्ये भवतां च नविदति ।
न्याय्यं स्म सह वैदेह्या द्रष्टुं तौ पार्थिवात्मजौ ॥ ६ ॥

अहमेकोऽपि पर्याप्तः सराक्षस गणां पुरीम् ।
तां लङ्कां तरसा हन्तुं रावणं च महाबलम् ॥ ७ ॥

किं पुनः सहितो वीरैर् बलवद्भिः कृतात्मभिः ।
कृतास्त्रैः प्लवगैः शूरैर् भवद्भिर् विजयैषिभिः ॥ ८ ॥

अहं तु रावणं युद्धे ससैन्यं सपुरःसरम् ।
सहपुत्रं वधिष्यामि सहोदर युतं युधि ॥ ९ ॥

ब्राह्ममैन्द्रं च रौद्रं च वायव्यं वारुणं तथा ।
यदि शक्रजितोऽस्त्राणि दुर्निरीक्षाणि सम्युगे ॥ १० ॥

तान्यहं विधमिष्यामि निहनिष्यामि राक्षसान् ।
भवतामभ् यनुज्ञातो विक्रमो मे रुणद्धि तम् ॥ ११ ॥

मयातुला विसृष्टा हि शैल वृष्टिर् निरन्तरा ।
देवानपि रणे हन्यात् किं पुनस्तान् निशाचरान् ॥ १२ ॥

सागरोऽप्यतियाद् वेलां मन्दरः प्रचलेदपि ।
न जाम्बवन्तं समरे कम्पयेदरि वाहिनी ॥ १३ ॥

सर्व राक्षस सङ्घानां राक्षसा ये च पूर्वकाः ।
अलमेको विनाशाय वीरो वालिसुतः कपिः ॥ १४ ॥

पनसस् योरु वेगेन नीलस्य च महात्मनः ।
मन्दरोऽपि विशीर्येत किं पुनर् युधि राक्षसाः ॥ १५ ॥

सदेवासुर यक्षेषु गन्धर्वोरग पक्षिषु ।
मैन्दस्य प्रतियोद्धारं शंसत द्विविदस्य वा ॥ १६ ॥

अश्विपुत्रौ महाभागा वेतौ प्लवग सत्तमौ ।
एतयोः प्रतियोद्धारं न पश्यामि रणाजिरे ॥ १७ ॥

मयैव निहता लङ्का दग्धा भस्मीकृता पुनः ।
राजमार्गेषु सर्वत्र नाम विश्रावितं मया ॥ १८ ॥

जयत्यति बलो रामो लक्ष्मणश्च महाबलः ।
राजा जयति सुग्रीवो राघवेणाभि पालितः ॥ १९ ॥

अहं कोसल राजस्य दासः पवन सम्भवः ।
हनुमानिति सर्वत्र नाम विश्रावितं मया ॥ २० ॥

अशोक वनिका मध्ये रावणस्य दुरात्मनः ।
अधस्ताच् छिंशुपा वृक्षे साध्वी करुणमास्थिता ॥ २१ ॥

राक्षसीभिः परिवृता शोक सन्ताप कर्शिता ।
मेघ लेखा परिवृता चन्द्र लेखेव निष्प्रभा ॥ २२ ॥

अचिन्तयन्ती वैदेही रावणं बलदर्पितम् ।
पतिव्रता च सुश्रोणी अवष्टब्धा च जानकी ॥ २३ ॥

अनुरक्ता हि वैदेही रामं सर्वात्मना शुभा ।
अनन्यचित्ता रामे च पौलोमीव पुरन्दरे ॥ २४ ॥

तदेकवासःसंवीता रजोध्वस्ता तथैव च ॥ २५ ॥

सा मया राक्षसी मध्ये तर्ज्यमाना मुहुर् मुहुः ।
राक्षसीभिर् विरूपाभिर् दृष्टा हि प्रमदावने ॥ २६ ॥

एक वेणीधरा दीना भर्तृ चिन्ता परायणा ।
अधःशय्या विवर्णाङ्गी पद्मिनीव हिमागमे ॥ २७ ॥

रावणाद् विनिवृत्तार्था मर्तव्य कृत निश्चया ।
कथञ्चिन् मृग शाबाक्षी विश्वास मुपपादिता ॥ २८ ॥

ततः सम्भाषिता चैव सर्वमर्थं च दर्शिता ।
राम सुग्रीव सख्यं च श्रुत्वा प्रीति मुपागता ॥ २९ ॥

नियतः समुदाचारो भक्तिर् भर्तरि चोत्तमा ।
यन्न हन्ति दशग्रीवं स महात्मा कृतागसम् ॥ ३० ॥

निमित् निमात्रं रामस्तु वधे तस्य भविष्यति ।
सा प्रकृत्यैव तन्वङ्गी तद् वियोगाच्च कर्शिता ॥ ३१ ॥

प्रतिपत् पाठ शीलस्य विद्येव तनुतां गता ।
एवमास्ते महाभागा सीता शोक परायणा ।
यदत्र प्रति कर्तव्यं तत् सर्व मुपपद्यताम् ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे
एकोनषष्टितमः सर्गः ॥ ५९ ॥